# Kamalamba Navavarana Kirtanas

# कमलाम्बा नवावरणं कीर्तनानि

## Document Information

Text title : kamalAmbAnavAvaraNam

File name : kamalAmbAnavAvaraNam.itx

Category : devii, lakShmI, kRitI, muttusvAmI-dIkShitAra, dhyAnam, devI, dashamahAvidyA

Location : doc_devii

Transliterated by : Pallasena Narayanaswami ppnswami at gmail.com

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Latest update : March 9, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# कमलाम्बा नवावरणं कीर्तनानि

## अथ नवावरणध्यानकीर्तनम् ।

नवावरणध्यानकीर्तनम् ।
॥ कमलाम्बिके ॥

रागं तोडि - रूपक ताळम्

पल्लवि

कमलाम्बिके आश्रितकल्पलतिके चण्डिके
कमनीयारुणांशुके करविधृतशुके मामव variation मामव जगदम्बिके

अनुपल्लवि

कमलासनादिपूजितकमलपदे बहुवरदे
कमलालयतीर्थवैभवे शिवे करुणार्णवे

चरणम्

सकललोकनायिके सङ्गीतरसिके
सुकवित्वप्रदायिके सुन्दरि गतमायिके
विकळेबरमुक्तिदाननिपुणे अघहरणे
वियदादिभूतकिरणे विनोदचरणे अरुणे

मध्यमकालसाहित्यम्

सकळे गुरुगुहकरणे सदाशिवान्तःकरणे
अ-क-च-ट-त-पादिवर्णे अखण्डैकरसपूर्णे

## ॥ प्रथमावरणकीर्तनम् (प्रथमा विभक्ति) ॥

॥ कमलाम्बा संरक्षतु माम् ॥

रागं आनन्दभैरवि - तिश्र त्रिपुट ताळम्

पल्लवि

कमलाम्बा संरक्षतु मां हृत्-
कमलानगरनिवासिनी

अनुपल्लवि

सुमनसाराधिताब्जमुखी सुन्दरमनःप्रियकरसखी
कमलजानन्दबोधसुखी कान्तातारपञ्जरशुकी

चरणम्

त्रिपुरादिचक्रेश्वरी अणिमादिसिद्धीश्वरी नित्यकामेश्वरी क्षि-
तिपुरत्रैलोक्यमोहनचक्रवर्तिनी प्रकटयोगिनी सुर-
रिपुमहिषासुरादिमर्दिनी निगमपुराणादिसंवेदिनी

मध्यमकालसाहित्यम्

त्रिपुरेशी गुरुगुहजननी त्रिपुरभञ्जनरञ्जनी मधु-
रिपुसहोदरी तलोदरी त्रिपुरसुन्दरी महेश्वरी

## ॥ द्वितीयावरण कीर्तनम् (द्वितीया विभक्ति) ॥

॥ कमलाम्बां भजरे ॥

रागं कल्याणि - आदि ताळम्

पल्लवि

कमलाम्बां भजरे रे मानस
कल्पितमायाकार्यं त्यज रे

अनुपल्लवि

कमलावाणीसेवितपार्श्वां कम्बुजयग्रीवां नतदेवां variation नतदेहां

मध्यमकालसाहित्यम्

कमलापुरसदनां मृदुगदनां कमनीयरदनां कमलवदनां

चरणम्

सर्वाशापरिपूरकचक्रस्वामिनीं परमशिवकामिनीं
दुर्वासार्चित गुप्तयोगिनीं दुःखध्वंसिनीं हंसिनीं
निर्वाणनिजसुखप्रदायिनीं नित्य कल्याणीं कात्यायनीं
शर्वाणीं मधुपविजयवेणीं सद्गुरुगुहजननीं निरञ्जनीं

मध्यमकालसाहित्यम्

गर्वितभण्डासुरभञ्जनीं कामाकर्षिण्यादिरञ्जनीं
निर्विशेषचैतन्यरूपिणीं उर्वीतत्वादिस्वरूपिणीम्

## ॥ तृतीयावरणकीर्तनम् (तृतीया विभक्ति) ॥

॥ श्री कमलाम्बिकया ॥

रागं शङ्कराभरणं - रूपक ताळम्

पल्लवि

श्रीकमलाम्बिकया कटाक्षितोऽहं
सच्चिदानन्दपरिपूर्णब्रह्मास्मि

अनुपल्लवि

पाकशासनादिसकलदेवतासेवितया
पङ्कजासनादिपञ्चकृत्यकृत् भावितया

मध्यमकालसाहित्यम्

शोकहरचतुरपदया मूकमुख्यवाक्प्रदया
कोकनदविजयपदया गुरुगुहतत्त्वैपदया

चरणम्

अनङ्गकुसुमाद्यष्टशक्त्याकारया
अरुणवर्णसङ्क्षोभणचक्राकारया variation चक्रागारया
अनन्तकोट्यण्डनायकशङ्करनायिकया
अष्टवर्गात्मकगुप्ततरया वरया

मध्यमकालसाहित्यम्

अनङ्गाद्युपासितया अष्टदळाब्जस्थितया
धनुर्बाणधरकरया दयासुधासागरया

## ॥ चतुर्थावरणकीर्तनम् (चतुर्थी विभक्ति) ॥

॥ कमलाम्बिकायै ॥

रागं काम्भोजि - अट ताळम्

पल्लवि

कमलाम्बिकायै कनकांशुकायै
कर्पूरवीटिकायै नमस्ते नमस्ते

अनुपल्लवि

कमलाकान्तानुजायै कामेश्वर्यै अजायै
हिमगिरितनुजायै ह्रीङ्कारपूज्यायै

मध्यमकालसाहित्यम्

कमलानगरविहारिण्यै खलसमूहसंहारिण्यै
कमनीयरत्नहारिण्यै कलिकल्मषपरिहारिण्यै

चरणम्

सकलसौभाग्यदायकाम्भोजचरणायै
सङ्क्षोभिण्यादिशक्तियुतचतुर्थावरणायै
प्रकटचतुर्दशभुवनभरणायै
प्रबलगुरुगुहसम्प्रदायान्तःकरणायै
अकळङ्करूपवर्णायै अपर्णायै सुपर्णायै
सुकरधृतचापबाणायै शोभनकरमनुकोणायै

मध्यमकालसाहित्यम्

सकुङ्कुमादिलेपनायै चराचरादिकल्पनायै
चिकुरविजिनीलघनायै चिदानन्दपूर्णघनायै

## ॥ पञ्चमावरणकीर्तनम् (पञ्चमी विभक्ति) ॥

॥ श्री कमलाम्बिकायाः परम् ॥

रागं भैरवि - झम्प ताळम्

पल्लवि

श्रीकमलाम्बिकायाः परं नहि रे रे चित्त variation कमलाम्बायाः
क्षित्यादिशिवान्ततत्वस्वरूपिण्याः

अनुपल्लवि

श्रीकण्ठविष्णुविरिञ्चादिजनयित्र्याः
शिवात्मकविश्वकर्त्र्याः कारयित्र्याः

मध्यमकालसाहित्यम्

श्रीकरबहिर्दशारचक्रस्थित्याः
सेवितभैरवीभार्गवीभारत्याः

चरणम्

नादमयसूक्ष्मरूपसर्वसिद्धिप्र -
दादिदशशक्त्याराधितमूर्तेः
श्रोत्रादिदशकरणात्मककुळकौळि-
कादि बहुविधोपासित कीर्तेः अ-
भेदनित्यशुद्धबुद्धमुक्तसच्चिदा-
नन्दमयपरमाद्वैतस्फूर्तेः variation सच्चिदानन्द परमाद्वैत
आदिमध्यान्तरहिताप्रमेयगुरुगुह-
मोदितसर्वार्थसाधकपूर्तेः मू- variation सर्वार्थसाधकस्फूर्तेः

मध्यम काल साहित्यम्

लादिनवाधारव्यावृत्तदशध्वनि -
भेदज्ञयोगिवृन्दसंरक्षण्याः
अनादिमायाऽविद्याकार्यकारणविनोद -
करणपटुतरकटाक्षवीक्षण्याः

## ॥ षष्ठ्यावरण कीर्तनम् (षष्ठी विभक्ति) ॥

॥ कमलाम्बिकायास्तव ॥

रागं पुन्नागवराळि - रूपक ताळम्

पल्लवि

कमलाम्बिकायास्तव भक्तोऽहं श-
ङ्कर्याः श्रीकर्याः सङ्गीतरसिकायाः श्री

अनुपल्लवि

सुमशरेक्षुकोदण्डपाशाङ्कुशपाण्याः अ-
तिमधुरतरवाण्याः शर्वाण्याः कल्याण्याः

मध्यमकालसाहित्यम्

रमणीयपुन्नागवराळिविजितवेण्याः श्री

चरणम्

दशकलात्मकवह्निस्वरूपप्रकाशान्त-
र्दशारसर्वरक्षाकरचक्रेश्वर्याः त्रि-
दशादिनुत क-च-वर्गद्वयमयसर्वज्ञादि त्रि-
दशशक्तिसमेतमालिनीचक्रेश्वर्याः त्रि-
दशविंशद्वर्णगर्भिणीकुण्डलिन्याः
दशमुद्रासमाराधितकौळिन्याः

मध्यमकालसाहित्यम्

दशरथादिनुतगुरुगुहजनकशिवबोधिन्याः
दशकरणवृत्तिमरीचिनिगर्भयोगिन्याः श्री

## ॥ सप्तमावरणकीर्तनम् (सप्तमी विभक्ति) ॥

॥ श्रीकमलाम्बिकायाम् ॥

रागं सहाना - त्रिपुट ताळम्

पल्लवि

श्रीकमलाम्बिकायां भक्तिं करोमि
श्रितकल्पवाटिकायां चण्डिकायां जगदम्बिकायां

अनुपल्लवि

राकाचन्द्रवदनायां राजीवनयनायां
पाकारिनुचरणायां आकाशादिकिरणायां

मध्यमकालसाहित्यम्

ह्रीङ्कारविपिनहरिण्यां ह्रीङ्कारसुशरीरिण्यां
ह्रीङ्कारतरुमञ्जर्यां ह्रीङ्कारेश्वर्यां गौर्यां

चरणम्

शरीरत्रयविलक्षण सुखतरस्वात्मानुभोगिन्यां
विरिञ्चि हरीशानहरिहयवेदित रहस्ययोगिन्यां
परादिवाग्देवतारूपवशिन्यादिविभागिन्यां
चरात्मकसर्वरोगहरनिरामयराजयोगिन्यां

मध्यमकालसाहित्यम्

करधृतवीणावादिन्यां कमलानगरविनोदिन्यां
सुरनरमुनिजनमोदिन्यां गुरुगुहवरप्रसादिन्यां

## ॥ अष्टमावरणकीर्तनम् (सम्बोधनाविभक्ति) ॥

॥ श्रीकमलाम्बिकेऽवाव ॥

रागं घण्टा - आदि ताळम्

पल्लवि

श्रीकमलाम्बिके अवाव
शिवे करधृतशुकशारिके

अनुपल्लवि

लोकपालिनि कपालिनि शूलिनि
लोकजननि भगमालिनि सकृदा-

मध्यमकालसाहित्यम्

लोकय मां सर्वसिद्धिप्रदायिके
त्रिपुराम्बिके बालाम्बिके

चरणम्

सन्तप्तहेमसन्निभदेहे सदाऽखण्डैकरसप्रवाहे
सन्तापहरत्रिकोणगेहे सकामेश्वरिशक्तिसमूहे variation सकामेश्वरिसक्तिसमूहे
सन्ततं मुक्तिघण्टामणि घोषायमानकवाटद्वारे अ-
नन्तगुरुगुहविदिते कराङ्गुलिनखोदयविष्णुदशावतारे

मध्यमकालसाहित्यम्

अन्तःकरणेक्षुकार्मुकशब्दादिपञ्चतन्मात्रविशिखा-
ऽत्यन्तरागपाशद्वेषाङ्कुशधरकरेऽतिरहस्ययोगिनीपरे

## ॥ नवमावरण कीर्तनम् ॥

॥ श्री कमलाम्बा जयति ॥

रागं आहिरि - रूपक ताळम्

पल्लवि

श्रीकमलाम्बा जयति अम्बा
श्रीकमलाम्बा जयति जगदम्बा
श्रीकमलाम्बा जयति शृङ्गाररसकदम्बा मदम्बा
श्री कमलाम्बा जयति चिद्बिम्बप्रतिबिम्बेन्दुबिम्बा
श्री कमलाम्बा जयति

मध्यमकालसाहित्यम्

श्रीपुरबिन्दुमध्यस्थचिन्तामणिमन्दिरस्थ -
शिवाकारमञ्चस्थित शिवकामेशाङ्कस्था

अनुपल्लवि

सूकराननाद्यर्चितमहात्रिपुरसुन्दरीं राजराजेश्वरीं

श्रीकर सर्वानन्दमयचक्रवासिनीं सुवासिनीं चिन्तयेऽहं दि-

मध्यमकालसाहित्यम्

वाकरशीतकिरणपावकादिविकासकरया
भीकरतापत्रयादिभेदनधुरीणतरया
पाकरिपुप्रमुखादिप्रार्थितसुकळेबरया
प्राकट्यपरापरया पालितोदयाकरया variation पालितोदयाकरया प्राकट्यपरापरया

चरणम्

श्रीमात्रे नमस्ते चिन्मात्रे सेवितरमाहरिखा variation रमाहरीशदिविधात्रे
वामादिशक्तिपूजितपरदेवतायाः सकलं जातं
कामादिद्वादशभिरुपासितकादि-हादि-सादिमन्त्ररूपिण्याः
प्रेमास्पदशिवगुरुगुहजनन्यां प्रीतियुक्तमच्चित्तं विलयतु

मध्यमकालसाहित्यम्

ब्रह्ममयप्रकाशिनी नामरूपविमर्शिनी
कामकलाप्रदर्शिनी सामरस्य निदर्शिनी

## ॥ नवावरणमङ्गळकीर्तनम् ॥

॥ श्री कमलाम्बिके ॥

रागं श्री - खण्ड जाति एक ताळम्

पल्लवि

श्रीकमलाम्बिके शिवे पाहि मां ललिते
श्रीपतिविनुते सितासिते शिवसहिते

समष्टि चरणम्

राकाचन्द्रमुखि रक्षितकोळमुखि
रमावाणीसखि राजयोगसुखि

मध्यमकालसाहित्यम्

शाकम्भरि शातोदरि चन्द्रकलाधरि

शङ्करि शङ्करगुरुगुहभक्तवशङ्करि
एकाक्षरि भुवनेश्वरि ईश प्रियकरि
श्रीकरि सुखकरि श्रीमहात्रिपुर सुन्दरि

See other file with commentary and detail word to word translation of these kRitis.

Compiled, encoded and proofread by
Pallasena Narayanaswami ppnswami at gmail.com

---

*Kamalamba Navavarana Kirtanas*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*